उत्तमानाञ्च मध्यानां हीनानां चैव वाजिनाम्। अर्द्धसप्तमहस्तं तु श्रेष्ठं दैर्घ्येण निर्दिशेत्। षड्भिश्च मुष्टिभिर्हीनं मध्यमं च विचक्षणः। पञ्चहस्तप्रमाणस्तु जघन्यः समुदाहृतः। द्वात्रिंशदङ्गुलं वक्त्रमुत्तमाश्वस्य कीर्त्तितम्। पृष्ठं वक्षः कटीं चैव मुखतुल्यं समादिशेत्। अङ्गुलीद्वयहीनं तु मुखादि मध्यमाधमम्। निर्दिशेन्मतिमान् वैद्यः वाजिशास्त्रविशारदः। सप्ताङ्गुलं खुरं चैव उत्तमाश्वस्य कीर्त्तितम्। षडङ्गुलं भवेन्मध्ये जघन्ये चतुरङ्गुलम्। षोड़शाङ्गुलदीर्घा तु जङ्घा चैवोत्तमे हये। चतुर्द्दशाङ्गुला मध्ये हीने च द्वादशाङ्गुला। एवंविधं प्रमाणं तु निर्दिष्टं शास्त्रशालिभिः। अपाङ्गात् पुच्छमूलं तु दैर्घ्येणाश्वं प्रमाणयेत्। खुरान्तात् ककुदं यावदूर्द्ध्वमानेन बुद्धिमान्। वक्षोभागे तु सर्वेभ्यो रज्ज्वा वा सूत्रकेण च। परिणाहं तुरङ्गस्य मापयेन्मतिमान्भिषक्। एवं प्रमाणभागेन विभक्ताङ्गश्च पूजितः। अतो हीनाधिकाङ्गाश्च हयो नैव पूजिताः"।

आवर्त्तादिकं विशेषयति हेमा० प०ख० ज्योति० पराशरसंहिता। "आवर्त्तो बहिर्मुखदक्षमण्डलरोमा, दीर्घवृत्तार्द्धरोमा शुक्तिः। कनकमन्तर्मुखदक्षरोमसंघातं, प्रफुल्लविकचरोम पुष्परमिति"। पुष्पं विशेषयति तत्रैव। "श्वेतं स्निग्धमन्यवर्णस्य प्रशस्तं श्वेतस्य कृष्णं पीतं रूक्षं रक्तं वा। यस्यान्यवर्णं ललाटे श्वेतं बालेन्दुतारकसंस्थानं वा पुष्पम्"।

अथाश्वायुर्लक्षणम् "आयुर्लक्षणमश्वानामतऊर्द्ध्वं प्रवक्ष्यते। शालिहोत्रादिनिर्दिष्टं यथा पूर्व्वं तपोधनैः। सुसंहताश्च ये वाहा ह्रस्वकर्णास्तथैव च। स्वरनेत्रस्वभावेषु न दीनाश्चिरजीविनः। महाघोणा महाकाया ये चाश्वाः पृथुवक्षसः। तेषां दीर्घं भवेदायुः स्निग्धाङ्गाश्चैव ये सदा। कर्णाग्रे पीड़िते येषां सिन्दूराभस्य दर्शनम्। शोणितस्य भवेत् क्षिप्रं ते मताश्चिरजीविनः। न विष्किरन्ति ये बालं खप्रासाय तुरङ्गमाः। न वा जिघ्रन्ति ये चापि तेऽपि दीर्घायुषो मताः। कुष्टिकानां क्रिया येषां दृश्यन्ते वाजिनां स्फुटाः। प्रतिस्रोतः पिबन्त्यम्भो ये च ते दीर्घजीविनः। पद्मपत्रदलाकारं जिह्वाग्रं यदि वाजिनः। दन्ताश्च मौक्तिकाकारा लिङ्गं येषां च निर्म्मलम्। सीत्कारं च भवेद्येषां लाङ्गूले चालनं पुनः। प्रस्वेदः शुभगन्धस्तु नखा वा दर्पणोपमाः। येषां च दृढ़रोमाणि ते सर्वे चिरजीविनः। स्निग्धा गम्भीरदीर्घाश्च प्रोथगा यस्य वाजिनः। भवन्ति विपुला रेखास्तं विद्याद्दीर्घजीविनम्। छत्रचामरभृङ्गारखड्गशङ्खाङ्कुशनिभाः। शुक्तिवज्रगदाकारा ध्वजपद्मसमोपमाः। श्रीवत्सस्वस्तिकाभासाः प्रोथरेखाश्चिरायुषाम्। ऊर्द्ध्वं प्रोथोत्थिता रेखा यस्य वामेन चानता। ह्रस्वा वा यस्य वाहस्य न चिरं तस्य जीवितम्। ऊर्द्ध्वं प्रोथसमा रेखा दृश्यते यस्य वाजिनः। तस्य मृत्युः समुद्दिष्टो दशमं प्राप्य वत्सरम्। त्र्यङ्गुला चेद् दश द्वे च वर्षाणां तस्य जीवितम्। त्रयोदशाब्दं स जीवेद्यस्यास्ये चतुरङ्गुले। तिर्य्यग्गे चोर्द्ध्वगे स्यातां द्वे रेखे चैव वाजिनः। प्रोथगे वाथ वाहस्य तस्य विद्याच्चतुर्द्दश। दक्षिणेन च पार्श्वेन यः शेते सर्व्वदा हयः। बहुमूत्रोऽल्पमूत्रश्च चिरं जीवति नो हयः। विनतः पूर्व्वकायेन स्थूलजानुश्च योहयः। मूनाक्षिकूटस्तब्धाक्षः स्वल्पायुः स प्रकीर्त्तितः। जातन्दन्तद्वयं बाल्ये पतत्यब्दे तृतीयके। चतुरो दशनान् विद्याच्चतुर्थे पतितोत्थितान्। पञ्चमे पतितोद्भूतान् षट् च दन्तान् मनीषिणः। षष्ठाब्देषु च वर्षेषु कालिकादिसमुद्भवः। कालिका हरिणी शुक्ला कृष्णा काचा समक्षिका। शङ्खा चैव क्रमेणाश्ववयसः परिसूचिकाः। वक्त्रान्ते कालिका रेखा कृष्णा दन्ताग्रसंस्थिता। षष्ठे च सप्तमे वर्षे चाष्टमे च भवेत् क्रमात्। आपीता हरिणी ज्ञेया कालिकास्थानमाश्रिता। नवमे दशमे वर्षे भवेदेकादशे तथा। कृष्णा चैव भवेच्छुक्ला दन्ते मूर्द्ध्नि समुद्भवा। द्वादशाब्दं समारभ्य भवेद्यावच्चतुर्द्दशम्। सिता सिद्धार्थकाकारा काचेति परिकीर्त्तिता। पञ्चदशाब्दमारभ्य यावत्सप्तदशादितः। मक्षिका मक्षिकाकारा भवेदष्टादशादिषु। विंशत्यन्तेषु वर्षेषु वाजिनां दशनोद्भवा। त्रयोविंशावसानेषु एकविंशादिषु त्रिषु। शङ्खाकारा भवेच्छङ्खा प्रमुक्तस्थानमाश्रिता। छिद्रं च चलनं चैव तथा पातश्च षष्टितः"। "अतिबद्धाः कषायाश्च तनवश्चेति तत्त्रयः। ते भवन्ति द्विवर्षस्य युक्ताश्चैव द्विजन्मना। ईषच्च शिरसः सूक्ष्मा भवेच्च पतितोत्थिता। खल्लाग्रा विपुला दन्ता भवन्ति पतितोत्थिताः। खल्लभागे विनापूर्णे व्यञ्जनानां न सम्भवः। पूर्णेषु खल्लभागेषु जायन्ते कालिकादयः। निम्नं कृष्णं च दन्ताग्रं खल्लमित्यभिधीयते। पूर्णतां चास्य जानीयात् षष्ठप्रभृतिवत्सरे। खल्लेषु कालिकाऽऽयाति नैव कार्य्या विचारणा। नियता कालिका रेखा सुपूर्णे दन्तमस्तके। द्वयोर्भवति षष्ठे द्वे चतुर्णां सप्तमे तथा। खल्लमष्टसु वर्षेषु दन्तानां कालिका क्रमात्। कालिकानुक्रमेणैव हरिण्यादिषु बुद्धिमान्। द्वौ द्वौ वर्षेण जानीयाद्वाजिनां व्यञ्जनं प्रति"।